# राहु कवचम्



# ॥ राहुकवचम् ॥

प्रणमामि सदा राहुं शूर्पाकारं किरीटिनम्।
सैंहिकेयं करालास्यं लोकानामभयप्रदम्॥ १ ॥

नीलांबरः शिरः पातु ललाटं लोकवन्दितः।
चक्षुषी पातु मे राहुः श्रोत्रे त्वर्धशरीरवान्॥ २ ॥

नासिकां मे धूम्रवर्णः शूलपाणिर्मुखं मम।
जिह्वां मे सिंहिकासूनुः कण्ठं मे कठिनांघ्रिकः॥ ३ ॥

भुजंगेशो भुजौ पातु नीलमाल्याम्बरः करौ।
पातु वक्षःस्थलं मन्त्री पातु कुक्षिं विधुंतुदः॥ ४ ॥

कटिं मे विकटः पातु ऊरू मे सुरपूजितः।
स्वर्भानुर्जानुनी पातु जंघे मे पातु जाड्यहा॥ ५ ॥

गुल्फौ ग्रहपतिः पातु पादौ मे भीषणाकृतिः।
सर्वाण्यंगानि मे पातु नीलचन्दनभूषणः॥ ६ ॥

राहोरिदं कवचमृद्धिदवस्तुदं यो
भक्त्या पठत्यनुदिनं नियतः शुचिः सन्।
प्राप्नोति कीर्तिमतुलां श्रियमृद्धिमायुर्-
आरोग्यमात्मविजयं च हि तत्प्रसादात्॥ ७॥

॥ इति श्रीमहाभारते धृतराष्ट्रसंजयसंवादे
द्रोणपर्वणि राहुकवचं संपूर्णम्॥


जय गुरुदेव